# શ્રીમહાલક્ષ્મીસહસ્રનામસ્તોત્રમ્ અથવા કમલાસહસ્રનામસ્તોત્રમ્

shrI mahAlaxmI sahasranAma stotram

sanskritdocuments.org

June 2, 2019

shrI mahAlaxmI sahasranAma stotram

# શ્રીમહાલક્ષ્મીસહસ્રનામસ્તોત્રમ્ અથવા કમલાસહસ્રનામસ્તોત્રમ્

## Sanskrit Document Information

Text title : mahaalaxmii sahasranaama stotra from brahmapuraaNa

File name : mahaalaxmisahasra.itx

Category : sahasranAma, devii, lakShmI, stotra, devI

Location : doc_devii

Proofread by : Kirk Wortman <kirkwort at hotmail.com>

Description-comments : from Devistutimanjari edited by Radhakrishnasastri

Acknowledge-Permission: Mahaperiaval trust

Latest update : August 13, 2002, May 8, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 2, 2019

*sanskritdocuments.org*

# શ્રીમહાલક્ષ્મીસહસ્રનામસ્તોત્રમ્ અથવા કમલાસહસ્રનામસ્તોત્રમ્

ૐ તામાહ્વયામિ સુભગાં લક્ષ્મીં ત્રૈલોક્યપૂજિતામ્ ।
એહ્યેહિ દેવિ પદ્માક્ષિ પદ્માકરકૃતાલયે ॥ ૧॥

આગચ્છાગચ્છ વરદે પશ્ય માં સ્વેન ચક્ષુષા ।
આયાહ્યાયાહિ ધર્માર્થકામમોક્ષમયે શુભે ॥ ૨॥

એવંવિધૈઃ સ્તુતિપદૈઃ સત્યૈઃ સત્યાર્થસંસ્તુતા ।
કનીયસી મહાભાગા ચન્દ્રેણ પરમાત્મના ॥ ૩॥

નિશાકરશ્ચ સા દેવી ભ્રાતરૌ દ્વૌ પયોનિધેઃ ।
ઉત્પન્નમાત્રૌ તાવાસ્તાં શિવકેશવસંશ્રિતૌ ॥ ૪॥

સનત્કુમારસ્તમૃષિં સમાભાષ્ય પુરાતનમ્ ।
પ્રોક્તવાનિતિહાસં તુ લક્ષ્મ્યાઃ સ્તોત્રમનુત્તમમ્ ॥ ૫॥

અથેદૃશાન્મહાઘોરાદ્ દારિદ્ર્યાન્નરકાત્કથમ્ ।
મુક્તિર્ભવતિ લોકેઽસ્મિન્ દારિદ્ર્યં યાતિ ભસ્મતામ્ ॥ ૬॥

સનત્કુમાર ઉવાચ -
પૂર્વં કૃતયુગે બ્રહ્મા ભગવાન્ સર્વલોકકૃત્ ।
સૃષ્ટિં નાનાવિધાં કૃત્વા પશ્ચાચ્ચિ ન્તામુપેયિવાન્ ॥ ૭॥

કિમાહારાઃ પ્રજાસ્ત્વેતાઃ સમ્ભવિષ્યન્તિ ભૂતલે ।
તથૈવ ચાસાં દારિદ્ર્યાત્કથમુત્તરણં ભવેત્ ॥ ૮॥

દારિદ્ર્યાન્મરણં શ્રેયસ્ત્વિતિ સઞ્ચિન્ત્ય ચેતસિ ।
ક્ષીરોદસ્યોત્તરે કૂલે જગામ કમલોદ્ભવઃ ॥ ૯॥

તત્ર તીવ્રં તપસ્તપ્ત્વા કદાચિત્પરમેશ્વરમ્ ।
દદર્શ પુણ્ડરીકાક્ષં વાસુદેવં જગદ્ગુરુમ્ ॥ ૧૦॥

સર્વજ્ઞં સર્વશક્તીનાં સર્વાવાસં સનાતનમ્ ।

સર્વેશ્વરં વાસુદેવં વિષ્ણું લક્ષ્મીપતિં પ્રભુમ્ ॥ ૧૧॥

સોમકોટિપ્રતીકાશં ક્ષીરોદ વિમલે જલે ।
અનન્તભોગશયનં વિશ્રાન્તં શ્રીનિકેતનમ્ ॥ ૧૨॥

કોટિસૂર્યપ્રતીકાશં મહાયોગેશ્વરેશ્વરમ્ ।
યોગનિદ્રારતં શ્રીશં સર્વાવાસં સુરેશ્વરમ્ ॥ ૧૩॥

જગદુત્પત્તિસંહારસ્થિતિકારણકારણમ્ ।
લક્ષ્મ્યાદિ શક્તિકરણજાતમણ્ડલમણ્ડિતમ્ ॥ ૧૪॥

આયુધૈર્દેહવદ્ભિશ્ચ ચક્રાદ્યૈઃ પરિવારિતમ્ ।
દુર્નિરીક્ષ્યં સુરૈઃ સિદ્ધૈઃ મહાયોનિશતૈરપિ ॥ ૧૫॥

આધારં સર્વશક્તીનાં પરં તેજઃ સુદુસ્સહમ્ ।
પ્રબુદ્ધ ં દેવમીશાનં દૃષ્ટ્વા કમલસમ્ભવઃ ॥ ૧૬॥

શિરસ્યઞ્જલિમાધાય સ્તોત્રં પૂર્વમુવાચ હ ।
મનોવાઞ્છિતસિદ્ધિ ં ત્વં પૂરયસ્વ મહેશ્વર ॥ ૧૭॥

જિતં તે પુણ્ડરીક્ષ નમસ્તે વિશ્વભાવન ।
નમસ્તેઽસ્તુ હૃષીકેશ મહાપુરુષપૂર્વજ ॥ ૧૮॥

સર્વેશ્વર જયાનન્દ સર્વાવાસ પરાત્પર ।
પ્રસીદ મમ ભક્તસ્ય છિન્ધિ સન્દેહજં તમઃ ॥ ૧૯॥

એવં સ્તુતઃ સ ભગવાન્ બ્રહ્મ ણાઽવ્યક્તજન્મના ।
પ્રસાદાભિમુખઃ પ્રાહ હરિર્વિશ્રાન્તલોચનઃ ॥ ૨૦॥

શ્રીભગવાનુવાચ -
હિરણ્યગર્ભ તુષ્ટોઽસ્મિ બ્રૂહિ યત્તેઽભિવાઞ્છિતમ્ ।
તદ્વક્ષ્યામિ ન સન્દેહો ભક્તોઽસિ મમ સુવ્રત ॥ ૨૧॥

કેશવાદ્વચનં શ્રુત્વા કરુણાવિષ્ટચેતનઃ ।
પ્રત્યુવાચ મહાબુદ્ધિર્ભગવન્તં જનાર્દનમ્ ॥ ૨૨॥

ચતુર્વિધં ભવસ્યાસ્ય ભૂતસર્ગસ્ય કેશવ ।
પરિત્રાણાય મે બ્રૂહિ રહસ્યં પરમાદ્ભુતમ્ ॥ ૨૩॥

દારિદ્ર્યશમનં ધન્યં મનોજ્ઞં પાવનં પરમ્ ।
સર્વેશ્વર મહાબુદ્ધ સ્વરૂપં ભૈરવં મહત્ ॥ ૨૪॥

શ્રિયઃ સર્વાતિશાયિન્યાસ્તથા જ્ઞાનં ચ શાશ્વતમ્ ।
નામાનિ ચૈવ મુખ્યાનિ યાનિ ગૌણાનિ ચાચ્યુત ॥ ૨૫॥

ત્વદ્વક્ત્રકમલોત્થાનિ શ્રોતુમિચ્છામિ તત્ત્વતઃ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા પ્રતિવાક્યમુવાચ સઃ ॥ ૨૬॥

શ્રીભગવાનુવાચ -
મહાવિભૂતિસંયુક્તા ષાડ્ગુણ્યવપુષઃ પ્રભો ।
ભગવદ્વાસુદેવસ્ય નિત્યં ચૈષાઽનપાયિની ॥ ૨૭॥

એકૈવ વર્તતેઽભિન્ના જ્યોત્સ્નેવ હિમદીધિતેઃ ।
સર્વશક્ત્યાત્મિકા ચૈવ વિશ્વં વ્યાપ્ય વ્યવસ્થિતા ॥ ૨૮॥

સર્વૈશ્વર્યગુણોપેતા નિત્યશુદ્ધસ્વરૂપિણી ।
પ્રાણશક્તિઃ પરા હ્યેષા સર્વેષાં પ્રાણિનાં ભુવિ ॥ ૨૯॥

શક્તીનાં ચૈવ સર્વાસાં યોનિભૂતા પરા કલા ।
અહં તસ્યાઃ પરં નામ્નાં સહસ્રમિદમુત્તમમ્ ॥ ૩૦॥

શૃણુષ્વાવહિતો ભૂત્વા પરમૈશ્વર્યભૂતિદમ્ ।
દેવ્યાખ્યાસ્મૃતિમાત્રેણ દારિદ્ર્યં યાતિ ભસ્મતામ્ ॥ ૩૧॥

અથ મહાલક્ષ્મીસહસ્રનામસ્તોત્રમ્ અથવા કમલાસહસ્રનામસ્તોત્રમ્ ।

શ્રીઃ પદ્મા પ્રકૃતિઃ સત્ત્વા શાન્તા ચિચ્છક્તિરવ્યયા ।
કેવલા નિષ્કલા શુદ્ધા વ્યાપિની વ્યોમવિગ્રહા ॥ ૧॥

વ્યોમપદ્મકૃતાધારા પરા વ્યોમામૃતોદ્ભવા ।
નિર્વ્યોમા વ્યોમમધ્યસ્થા પઞ્ચવ્યોમપદાશ્રિતા ॥ ૨॥

અચ્યુતા વ્યોમનિલયા પરમાનન્દરૂપિણી ।
નિત્યશુદ્ધા નિત્યતૃપ્તા નિર્વિકારા નિરીક્ષણા ॥ ૩॥

જ્ઞાનશક્તિઃ કર્તૃશક્તિર્ભોક્તૃશક્તિઃ શિખાવહા ।
સ્નેહાભાસા નિરાનન્દા વિભૂતિર્વિમલાચલા ॥ ૪॥

અનન્તા વૈષ્ણવી વ્યક્તા વિશ્વાનન્દા વિકાસિની ।
શક્તિર્વિભિન્નસર્વાર્તિઃ સમુદ્રપરિતોષિણી ॥ ૫॥

મૂર્તિઃ સનાતની હાર્દી નિસ્તરઙ્ગા નિરામયા ।

જ્ઞાનજ્ઞેયા જ્ઞાનગમ્યા જ્ઞાનજ્ઞેયવિકાસિની ॥ ૬॥

સ્વચ્છન્દશક્તિર્ગહના નિષ્કમ્પાર્ચિઃ સુનિર્મલા ।
સ્વરૂપા સર્વગા પારા બૃંહિણી સુગુણોર્જિતા ॥ ૭॥

અકલઙ્કા નિરાધારા નિઃસંકલ્પા નિરાશ્રયા ।
અસંકીર્ણા સુશાન્તા ચ શાશ્વતી ભાસુરી સ્થિરા ॥ ૮॥

અનૌપમ્યા નિર્વિકલ્પા નિયન્ત્રી યન્ત્રવાહિની ।
અભેદ્યા ભેદિની ભિન્ના ભારતી વૈખરી ખગા ॥ ૯॥

અગ્રાહ્યા ગ્રાહિકા ગૂઢા ગમ્ભીરા વિશ્વગોપિની ।
અનિર્દેશ્યા પ્રતિહતા નિર્બીજા પાવની પરા ॥ ૧૦॥

અપ્રતર્ક્યા પરિમિતા ભવભ્રાન્તિવિનાશિની ।
એકા દ્વિરૂપા ત્રિવિધા અસંખ્યાતા સુરેશ્વરી ॥ ૧૧॥

સુપ્રતિષ્ઠા મહાધાત્રી સ્થિતિર્વૃદ્ધિર્ધ્રુવા ગતિઃ ।
ઈશ્વરી મહિમા ઋદ્ધિઃ પ્રમોદા ઉજ્જ્વલોદ્યમા ॥ ૧૨॥

અક્ષયા વર્દ્ધમાના ચ સુપ્રકાશા વિહઙ્ગમા ।
નીરજા જનની નિત્યા જયા રોચિષ્મતી શુભા ॥ ૧૩॥

તપોનુદા ચ જ્વાલા ચ સુદીપ્તિશ્ચાંશુમાલિની ।
અપ્રમેયા ત્રિધા સૂક્ષ્મા પરા નિર્વાણદાયિની ॥ ૧૪॥

અવદાતા સુશુદ્ધા ચ અમોઘાખ્યા પરમ્પરા ।
સંધાનકી શુદ્ધવિદ્યા સર્વભૂતમહેશ્વરી ॥ ૧૫॥

લક્ષ્મીસ્તુષ્ટિર્મહાધીરા શાન્તિરાપૂરણાનવા ।
અનુગ્રહા શક્તિરાદ્યા જગજ્જ્યેષ્ઠા જગદ્વિધિઃ ॥ ૧૬॥

સત્યા પ્રહ્વા ક્રિયા યોગ્યા અપર્ણા હ્લાદિની શિવા ।
સમ્પૂર્ણાહ્લાદિની શુદ્ધા જ્યોતિષ્મત્યમૃતાવહા ॥ ૧૭॥

રજોવત્યર્કપ્રતિભાઽઽકર્ષિણી કર્ષિણી રસા ।
પરા વસુમતી દેવી કાન્તિઃ શાન્તિર્મતિઃ કલા ॥ ૧૮॥

કલા કલઙ્કરહિતા વિશાલોદ્દીપની રતિઃ ।
સમ્બોધિની હારિણી ચ પ્રભાવા ભવભૂતિદા ॥ ૧૯॥

અમૃતસ્યન્દિની જીવા જનની ખણ્ડિકા સ્થિરા ।
ધૂમા કલાવતી પૂર્ણા ભાસુરા સુમતીરસા ॥ ૨૦॥

શુદ્ધા ધ્વનિઃ સૃતિઃ સૃષ્ટિર્વિકૃતિઃ કૃષ્ટિરેવ ચ ।
પ્રાપણી પ્રાણદા પ્રહ્વા વિશ્વા પાણ્ડુરવાસિની ॥ ૨૧॥

અવનિર્વજ્રનલિકા ચિત્રા બ્રહ્માણ્ડવાસિની ।
અનન્તરૂપાનન્તાત્માનન્તસ્થાનન્તસમ્ભવા ॥ ૨૨॥

મહાશક્તિઃ પ્રાણશક્તિઃ પ્રાણદાત્રી ઋતમ્ભરા ।
મહાસમૂહા નિખિલા ઇચ્છાધારા સુખાવહા ॥ ૨૩॥

પ્રત્યક્ષલક્ષ્મીર્નિષ્કમ્પા પ્રરોહાબુદ્ધિગોચરા ।
નાનાદેહા મહાવર્તા બહુદેહવિકાસિની ॥ ૨૪॥

સહસ્રાણી પ્રધાના ચ ન્યાયવસ્તુપ્રકાશિકા ।
સર્વાભિલાષપૂર્ણેચ્છા સર્વા સર્વાર્થભાષિણી ॥ ૨૫॥

નાનાસ્વરૂપચિદ્ધાત્રી શબ્દપૂર્વા પુરાતની ।
વ્યક્તાવ્યક્તા જીવકેશા સર્વેચ્છાપરિપૂરિતા ॥ ૨૬॥

સંકલ્પસિદ્ધા સાંખ્યેયા તત્ત્વગર્ભા ધરાવહા ।
ભૂતરૂપા ચિત્સ્વરૂપા ત્રિગુણા ગુણગર્વિતા ॥ ૨૭॥

પ્રજાપતીશ્વરી રૌદ્રી સર્વાધારા સુખાવહા ।
કલ્યાણવાહિકા કલ્યા કલિકલ્મષનાશિની ॥ ૨૮॥

નીરૂપોદ્ભિન્નસંતાના સુયન્ત્રા ત્રિગુણાલયા ।
મહામાયા યોગમાયા મહાયોગેશ્વરી પ્રિયા ॥ ૨૯॥

મહાસ્ત્રી વિમલા કીર્તિર્જયા લક્ષ્મીર્નિરઞ્જના ।
પ્રકૃતિર્ભગવન્માયા શક્તિર્નિદ્રા યશસ્કરી ॥ ૩૦॥

ચિન્તા બુદ્ધિર્યશઃ પ્રજ્ઞા શાન્તિઃ સુપ્રીતિવર્દ્ધિની ।
પ્રદ્યુમ્નમાતા સાધ્વી ચ સુખસૌભાગ્યસિદ્ધિદા ॥ ૩૧॥

કાષ્ઠા નિષ્ઠા પ્રતિષ્ઠા ચ જ્યેષ્ઠા શ્રેષ્ઠા જયાવહા ।
સર્વાતિશાયિની પ્રીતિર્વિશ્વશક્તિર્મહાબલા ॥ ૩૨॥

વરિષ્ઠા વિજયા વીરા જયન્તી વિજયપ્રદા ।
હૃદ્ગૃહા ગોપિની ગુહ્યા ગણગન્ધર્વસેવિતા ॥ ૩૩॥

યોગીશ્વરી યોગમાયા યોગિની યોગસિદ્ધિદા ।
મહાયોગેશ્વરવૃતા યોગા યોગેશ્વરપ્રિયા ॥ ૩૪॥

બ્રહ્મેન્દ્રરુદ્રનમિતા સુરાસુરવરપ્રદા ।
ત્રિવર્ત્મગા ત્રિલોકસ્થા ત્રિવિક્રમપદોદ્ભવા ॥ ૩૫॥

સુતારા તારિણી તારા દુર્ગા સંતારિણી પરા ।
સુતારિણી તારયન્તી ભૂરિતારેશ્વરપ્રભા ॥ ૩૬॥

ગુહ્યવિદ્યા યજ્ઞવિદ્યા મહાવિદ્યા સુશોભિતા ।
અધ્યાત્મવિદ્યા વિઘ્નેશી પદ્મસ્થા પરમેષ્ઠિની ॥ ૩૭॥

આન્વીક્ષિકી ત્રયી વાર્તા દણ્ડનીતિર્નયાત્મિકા ।
ગૌરી વાગીશ્વરી ગોપ્ત્રી ગાયત્રી કમલોદ્ભવા ॥ ૩૮॥

વિશ્વમ્ભરા વિશ્વરૂપા વિશ્વમાતા વસુપ્રદા ।
સિદ્ધિઃ સ્વાહા સ્વધા સ્વસ્તિઃ સુધા સર્વાર્થસાધિની ॥ ૩૯॥

ઇચ્છા સૃષ્ટિર્દ્યુતિર્ભૂતિઃ કીર્તિઃ શ્રદ્ધા દયામતિઃ ।
શ્રુતિર્મેધા ધૃતિર્હ્રીઃ શ્રીર્વિદ્યા વિબુધવન્દિતા ॥ ૪૦॥

અનસૂયા ઘૃણા નીતિર્નિર્વૃતિઃ કામધુક્કરા ।
પ્રતિજ્ઞા સંતતિર્ભૂતિર્દ્યૌઃ પ્રજ્ઞા વિશ્વમાનિની ॥ ૪૧॥

સ્મૃતિર્વાગ્વિશ્વજનની પશ્યન્તી મધ્યમા સમા ।
સંધ્યા મેધા પ્રભા ભીમા સર્વાકારા સરસ્વતી ॥ ૪૨॥

કાઙ્ક્ષા માયા મહામાયા મોહિની માધવપ્રિયા ।
સૌમ્યાભોગા મહાભોગા ભોગિની ભોગદાયિની ॥ ૪૩॥

સુધૌતકનકપ્રખ્યા સુવર્ણકમલાસના ।
હિરણ્યગર્ભા સુશ્રોણી હારિણી રમણી રમા ॥ ૪૪॥

ચન્દ્રા હિરણ્મયી જ્યોત્સ્ના રમ્યા શોભા શુભાવહા ।
ત્રૈલોક્યમણ્ડના નારી નરેશ્વરવરાર્ચિતા ॥ ૪૫॥

ત્રૈલોક્યસુન્દરી રામા મહાવિભવવાહિની ।
પદ્મસ્થા પદ્મનિલયા પદ્મમાલાવિભૂષિતા ॥ ૪૬॥

પદ્મયુગ્મધરા કાન્તા દિવ્યાભરણભૂષિતા ।

વિચિત્રરત્નમુકુટા વિચિત્રામ્બરભૂષણા ॥ ૪૭॥

વિચિત્રમાલ્યગન્ધાઢ્યા વિચિત્રાયુધવાહના ।
મહાનારાયણી દેવી વૈષ્ણવી વીરવન્દિતા ॥ ૪૮॥

કાલસંકર્ષિણી ઘોરા તત્ત્વસંકર્ષિણીકલા ।
જગત્સમ્પૂરણી વિશ્વા મહાવિભવભૂષણા ॥ ૪૯॥

વારુણી વરદા વ્યાખ્યા ઘણ્ટાકર્ણવિરાજિતા ।
નૃસિંહી ભૈરવી બ્રાહ્મી ભાસ્કરી વ્યોમચારિણી ॥ ૫૦॥

ઐન્દ્રી કામધેનુઃ સૃષ્ટિઃ કામયોનિર્મહાપ્રભા ।
દૃષ્ટા કામ્યા વિશ્વશક્તિર્બીજગત્યાત્મદર્શના ॥ ૫૧॥

ગરુડારૂઢહૃદયા ચાન્દ્રી શ્રીર્મધુરાનના ।
મહોગ્રરૂપા વારાહી નારસિંહી હતાસુરા ॥ ૫૨॥

યુગાન્તહુતભુગ્જ્વાલા કરાલા પિઙ્ગલાકલા ।
ત્રૈલોક્યભૂષણા ભીમા શ્યામા ત્રૈલોક્યમોહિની ॥ ૫૩॥

મહોત્કટા મહારક્તા મહાચણ્ડા મહાસના ।
શઙ્ખિની લેખિની સ્વસ્થા લિખિતા ખેચરેશ્વરી ॥ ૫૪॥

ભદ્રકાલી ચૈકવીરા કૌમારી ભવમાલિની ।
કલ્યાણી કામધુગ્જ્વાલામુખી ચોત્પલમાલિકા ॥ ૫૫॥

બાલિકા ધનદા સૂર્યા હૃદયોત્પલમાલિકા ।
અજિતા વર્ષિણી રીતિર્ભરુણ્ડા ગરુડાસના ॥ ૫૬॥

વૈશ્વાનરી મહામાયા મહાકાલી વિભીષણા ।
મહામન્દારવિભવા શિવાનન્દા રતિપ્રિયા ॥ ૫૭॥

ઉદ્રીતિઃ પદ્મમાલા ચ ધર્મવેગા વિભાવની ।
સત્ક્રિયા દેવસેના ચ હિરણ્યરજતાશ્રયા ॥ ૫૮॥

સહસાવર્તમાના ચ હસ્તિનાદપ્રબોધિની ।
હિરણ્યપદ્મવર્ણા ચ હરિભદ્રા સુદુર્દ્ધરા ॥ ૫૯॥

સૂર્યા હિરણ્યપ્રકટસદૃશી હેમમાલિની ।
પદ્માનના નિત્યપુષ્ટા દેવમાતા મૃતોદ્ભવા ॥ ૬૦॥

મહાધના ચ યા શૃઙ્ગી કર્દમી કમ્બુકન્ધરા ।
આદિત્યવર્ણા ચન્દ્રાભા ગન્ધદ્વારા દુરાસદા ॥ ૬૧॥

વરાર્ચિતા વરારોહા વરેણ્યા વિષ્ણુવલ્લભા ।
કલ્યાણી વરદા વામા વામેશી વિન્ધ્યવાસિની ॥ ૬૨॥

યોગનિદ્રા યોગરતા દેવકી કામરૂપિણી ।
કંસવિદ્રાવિણી દુર્ગા કૌમારી કૌશિકી ક્ષમા ॥ ૬૩॥

કાત્યાયની કાલરાત્રિર્નિશિતૃપ્તા સુદુર્જયા ।
વિરૂપાક્ષી વિશાલાક્ષી ભક્તાનાંપરિરક્ષિણી ॥ ૬૪॥

બહુરૂપા સ્વરૂપા ચ વિરૂપા રૂપવર્જિતા ।
ઘણ્ટાનિનાદબહુલા જીમૂતધ્વનિનિઃસ્વના ॥ ૬૫॥

મહાદેવેન્દ્રમથિની ભ્રુકુટીકુટિલાનના ।
સત્યોપયાચિતા ચૈકા કૌબેરી બ્રહ્મચારિણી ॥ ૬૬॥

આર્યા યશોદા સુતદા ધર્મકામાર્થમોક્ષદા ।
દારિદ્ર્યદુઃખશમની ઘોરદુર્ગાર્તિનાશિની ॥ ૬૭॥

ભક્તાર્તિશમની ભવ્યા ભવભર્ગાપહારિણી ।
ક્ષીરાબ્ધિતનયા પદ્મા કમલા ધરણીધરા ॥ ૬૮॥

રુક્મિણી રોહિણી સીતા સત્યભામા યશસ્વિની ।
પ્રજ્ઞાધારામિતપ્રજ્ઞા વેદમાતા યશોવતી ॥ ૬૯॥

સમાધિર્ભાવના મૈત્રી કરુણા ભક્તવત્સલા ।
અન્તર્વેદી દક્ષિણા ચ બ્રહ્મચર્યપરાગતિઃ ॥ ૭૦॥

દીક્ષા વીક્ષા પરીક્ષા ચ સમીક્ષા વીરવત્સલા ।
અમ્બિકા સુરભિઃ સિદ્ધા સિદ્ધવિદ્યાધરાર્ચિતા ॥ ૭૧॥

સુદીક્ષા લેલિહાના ચ કરાલા વિશ્વપૂરકા ।
વિશ્વસંધારિણી દીપ્તિસ્તાપની તાણ્ડવપ્રિયા ॥ ૭૨॥

ઉદ્ભવા વિરજા રાજ્ઞી તાપની બિન્દુમાલિની ।
ક્ષીરધારાસુપ્રભાવા લોકમાતા સુવર્ચસા ॥ ૭૩॥

હવ્યગર્ભા ચાજ્યગર્ભા જુહ્વતોયજ્ઞસમ્ભવા ।
આપ્યાયની પાવની ચ દહની દહનાશ્રયા ॥ ૭૪॥

માતૃકા માધવી મુખ્યા મોક્ષલક્ષ્મીર્મહર્દ્ધિદા ।
સર્વકામપ્રદા ભદ્રા સુભદ્રા સર્વમઙ્ગલા ॥ ૭૫॥

શ્વેતા સુશુક્લવસના શુક્લમાલ્યાનુલેપના ।
હંસા હીનકરી હંસી હૃદ્યા હૃત્કમલાલયા ॥ ૭૬॥

સિતાતપત્રા સુશ્રોણી પદ્મપત્રાયતેક્ષણા ।
સાવિત્રી સત્યસંકલ્પા કામદા કામકામિની ॥ ૭૭॥

દર્શનીયા દૃશા દૃશ્યા સ્પૃશ્યા સેવ્યા વરાઙ્ગના ।
ભોગપ્રિયા ભોગવતી ભોગીન્દ્રશયનાસના ॥ ૭૮॥

આર્દ્રા પુષ્કરિણી પુણ્યા પાવની પાપસૂદની ।
શ્રીમતી ચ શુભાકારા પરમૈશ્વર્યભૂતિદા ॥ ૭૯॥

અચિન્ત્યાનન્તવિભવા ભવભાવવિભાવની ।
નિશ્રેણિઃ સર્વદેહસ્થા સર્વભૂતનમસ્કૃતા ॥ ૮૦॥

બલા બલાધિકા દેવી ગૌતમી ગોકુલાલયા ।
તોષિણી પૂર્ણચન્દ્રાભા એકાનન્દા શતાનના ॥ ૮૧॥

ઉદ્યાનનગરદ્વારહર્મ્યોપવનવાસિની ।
કૂષ્માણ્ડા દારુણા ચણ્ડા કિરાતી નન્દનાલયા ॥ ૮૨॥

કાલાયના કાલગમ્યા ભયદા ભયનાશિની ।
સૌદામની મેઘરવા દૈત્યદાનવમર્દિની ॥ ૮૩॥

જગન્માતા ભયકરી ભૂતધાત્રી સુદુર્લભા ।
કાશ્યપી શુભદાતા ચ વનમાલા શુભાવરા ॥ ૮૪॥

ધન્યા ધન્યેશ્વરી ધન્યા રત્નદા વસુવર્દ્ધિની ।
ગાન્ધર્વી રેવતી ગઙ્ગા શકુની વિમલાનના ॥ ૮૫॥

ઇડા શાન્તિકરી ચૈવ તામસી કમલાલયા ।
આજ્યપા વજ્રકૌમારી સોમપા કુસુમાશ્રયા ॥ ૮૬॥

જગત્પ્રિયા ચ સરથા દુર્જયા ખગવાહના ।
મનોભવા કામચારા સિદ્ધચારણસેવિતા ॥ ૮૭॥

વ્યોમલક્ષ્મીર્મહાલક્ષ્મીસ્તેજોલક્ષ્મીઃ સુજાજ્વલા ।

રસલક્ષ્મીર્જગદ્યોનિર્ગન્ધલક્ષ્મીર્વનાશ્રયા ॥ ૮૮॥

શ્રવણા શ્રાવણી નેત્રી રસનાપ્રાણચારિણી ।
વિરિઞ્ચિમાતા વિભવા વરવારિજવાહના ॥ ૮૯॥

વીર્યા વીરેશ્વરી વન્દ્યા વિશોકા વસુવર્દ્ધિની ।
અનાહતા કુણ્ડલિની નલિની વનવાસિની ॥ ૯૦॥

ગાન્ધારિણીન્દ્રનમિતા સુરેન્દ્રનમિતા સતી ।
સર્વમઙ્ગલ્યમાઙ્ગલ્યા સર્વકામસમૃદ્ધિદા ॥ ૯૧॥

સર્વાનન્દા મહાનન્દા સત્કીર્તિઃ સિદ્ધસેવિતા ।
સિનીવાલી કુહૂ રાકા અમા ચાનુમતિર્દ્યુતિઃ ॥ ૯૨॥

અરુન્ધતી વસુમતી ભાર્ગવી વાસ્તુદેવતા ।
માયૂરી વજ્રવેતાલી વજ્રહસ્તા વરાનના ॥ ૯૩॥

અનઘા ધરણિર્ધીરા ધમની મણિભૂષણા ।
રાજશ્રી રૂપસહિતા બ્રહ્મશ્રીર્બ્રહ્મવન્દિતા ॥ ૯૪॥

જયશ્રીર્જયદા જ્ઞેયા સર્ગશ્રીઃ સ્વર્ગતિઃ સતામ્ ।
સુપુષ્પા પુષ્પનિલયા ફલશ્રીર્નિષ્કલપ્રિયા ॥ ૯૫॥

ધનુર્લક્ષ્મીસ્ત્વમિલિતા પરક્રોધનિવારિણી ।
કદ્રૂર્દ્ધનાયુઃ કપિલા સુરસા સુરમોહિની ॥ ૯૬॥

મહાશ્વેતા મહાનીલા મહામૂર્તિર્વિષાપહા ।
સુપ્રભા જ્વાલિની દીપ્તિસ્તૃપ્તિર્વ્યાપ્તિઃ પ્રભાકરી ॥ ૯૭॥

તેજોવતી પદ્મબોધા મદલેખારુણાવતી ।
રત્ના રત્નાવલી ભૂતા શતધામા શતાપહા ॥ ૯૮॥

ત્રિગુણા ઘોષિણી રક્ષ્યા નર્દ્દિની ઘોષવર્જિતા ।
સાધ્યા દિતિર્દિતિદેવી મૃગવાહા મૃગાઙ્ગગા ॥ ૯૯॥

ચિત્રનીલોત્પલગતા વૃષરત્નકરાશ્રયા ।
હિરણ્યરજતદ્વન્દ્વા શઙ્ખભદ્રાસનાસ્થિતા ॥ ૧૦૦॥

ગોમૂત્રગોમયક્ષીરદધિસર્પિર્જલાશ્રયા ।
મરીચિશ્ચીરવસના પૂર્ણા ચન્દ્રાર્કવિષ્ટરા ॥ ૧૦૧॥

સુસૂક્ષ્મા નિર્વૃતિઃ સ્થૂલા નિવૃત્તારાતિરેવ ચ ।
મરીચિજ્વાલિની ધૂમ્રા હવ્યવાહા હિરણ્યદા ॥ ૧૦૨॥

દાયિની કાલિની સિદ્ધિઃ શોષિણી સમ્પ્રબોધિની ।
ભાસ્વરા સંહતિસ્તીક્ષ્ણા પ્રચણ્ડજ્વલનોજ્જ્વલા ॥ ૧૦૩॥

સાઙ્ગા પ્રચણ્ડા દીપ્તા ચ વૈદ્યુતિઃ સુમહાદ્યુતિઃ ।
કપિલા નીલરક્તા ચ સુષુમ્ણા વિસ્ફુલિઙ્ગિની ॥ ૧૦૪॥

અર્ચિષ્મતી રિપુહરા દીર્ઘા ધૂમાવલી જરા ।
સમ્પૂર્ણમણ્ડલા પૂષા સ્રંસિની સુમનોહરા ॥ ૧૦૫॥

જયા પુષ્ટિકરીચ્છાયા માનસા હૃદયોજ્જ્વલા ।
સુવર્ણકરણી શ્રેષ્ઠા મૃતસંજીવિનીરણે ॥ ૧૦૬॥

વિશલ્યકરણી શુભ્રા સંધિની પરમૌષધિઃ ।
બ્રહ્મિષ્ઠા બ્રહ્મસહિતા ઐન્દવી રત્નસમ્ભવા ॥ ૧૦૭॥

વિદ્યુત્પ્રભા બિન્દુમતી ત્રિસ્વભાવગુણામ્બિકા ।
નિત્યોદિતા નિત્યહૃષ્ટા નિત્યકામકરીષિણી ॥ ૧૦૮॥

પદ્માઙ્કા વજ્રચિહ્ના ચ વક્રદણ્ડવિભાસિની ।
વિદેહપૂજિતા કન્યા માયા વિજયવાહિની ॥ ૧૦૯॥

માનિની મઙ્ગલા માન્યા માલિની માનદાયિની ।
વિશ્વેશ્વરી ગણવતી મણ્ડલા મણ્ડલેશ્વરી ॥ ૧૧૦॥

હરિપ્રિયા ભૌમસુતા મનોજ્ઞા મતિદાયિની ।
પ્રત્યઙ્ગિરા સોમગુપ્તા મનોઽભિજ્ઞા વદન્મતિઃ ॥ ૧૧૧॥

યશોધરા રત્નમાલા કૃષ્ણા ત્રૈલોક્યબન્ધની ।
અમૃતા ધારિણી હર્ષા વિનતા વલ્લકી શચી ॥ ૧૧૨॥

સંકલ્પા ભામિની મિશ્રા કાદમ્બર્યમૃતપ્રભા ।
અગતા નિર્ગતા વજ્રા સુહિતા સંહિતાક્ષતા ॥ ૧૧૩॥

સર્વાર્થસાધનકરી ધાતુર્ધારણિકામલા ।
કરુણાધારસમ્ભૂતા કમલાક્ષી શશિપ્રિયા ॥ ૧૧૪॥

સૌમ્યરૂપા મહાદીપ્તા મહાજ્વાલા વિકાશિની ।
માલા કાઞ્ચનમાલા ચ સદ્વજ્રા કનકપ્રભા ॥ ૧૧૫॥

પ્રક્રિયા પરમા યોક્ત્રી ક્ષોભિકા ચ સુખોદયા ।
વિજૃમ્ભણા ચ વજ્રાખ્યા શૃઙ્ખલા કમલેક્ષણા ॥ ૧૧૬॥

જયંકરી મધુમતી હરિતા શશિની શિવા ।
મૂલપ્રકૃતિરીશાની યોગમાતા મનોજવા ॥ ૧૧૭॥

ધર્મોદયા ભાનુમતી સર્વાભાસા સુખાવહા ।
ધુરન્ધરા ચ બાલા ચ ધર્મસેવ્યા તથાગતા ॥ ૧૧૮॥

સુકુમારા સૌમ્યમુખી સૌમ્યસમ્બોધનોત્તમા ।
સુમુખી સર્વતોભદ્રા ગુહ્યશક્તિર્ગુહાલયા ॥ ૧૧૯॥

હલાયુધા ચૈકવીરા સર્વશસ્ત્રસુધારિણી ।
વ્યોમશક્તિર્મહાદેહા વ્યોમગા મધુમન્મયી ॥ ૧૨૦॥

ગઙ્ગા વિતસ્તા યમુના ચન્દ્રભાગા સરસ્વતી ।
તિલોત્તમોર્વશી રમ્ભા સ્વામિની સુરસુન્દરી ॥ ૧૨૧॥

બાણપ્રહરણાવાલા બિમ્બોષ્ઠી ચારુહાસિની ।
કકુભિની ચારુપૃષ્ઠા દૃષ્ટાદૃષ્ટફલપ્રદા ॥ ૧૨૨॥

કામ્યાચરી ચ કામ્યા ચ કામાચારવિહારિણી ।
હિમશૈલેન્દ્રસંકાશા ગજેન્દ્રવરવાહના ॥ ૧૨૩॥

અશેષસુખસૌભાગ્યસમ્પદા યોનિરુત્તમા ।
સર્વોત્કૃષ્ટા સર્વમયી સર્વા સર્વેશ્વરપ્રિયા ॥ ૧૨૪॥

સર્વાઙ્ગયોનિઃ સાવ્યક્તા સમ્પ્રધાનેશ્વરેશ્વરી ।
વિષ્ણુવક્ષઃસ્થલગતા કિમતઃ પરમુચ્યતે ॥ ૧૨૫॥

પરા નિર્મહિમા દેવી હરિવક્ષઃસ્થલાશ્રયા ।
સા દેવી પાપહન્ત્રી ચ સાન્નિધ્યં કુરુતાન્મમ ॥ ૧૨૬॥

ઇતિ નામ્નાં સહસ્રં તુ લક્ષ્મ્યાઃ પ્રોક્તં શુભાવહમ્ ।
પરાવરેણ ભેદેન મુખ્યગૌણેન ભાગતઃ ॥ ૧૨૭॥

યશ્ચૈતત્ કીર્તયેન્નિત્યં શૃણુયાદ્ વાપિ પદ્મજ ।
શુચિઃ સમાહિતો ભૂત્વા ભક્તિશ્રદ્ધાસમન્વિતઃ ॥ ૧૨૮॥

શ્રીનિવાસં સમભ્યર્ચ્ય પુષ્પધૂપાનુલેપનૈઃ ।

ભોગૈશ્ચ મધુપર્કાદ્યૈર્યથાશક્તિ જગદ્ગુરુમ્ ॥ ૧૨૯॥

તત્પાર્શ્વસ્થાં શ્રિયં દેવીં સમ્પૂજ્ય શ્રીધરપ્રિયામ્ ।
તતો નામસહસ્રોણ તોષયેત્ પરમેશ્વરીમ્ ॥ ૧૩૦॥

નામરત્નાવલીસ્તોત્રમિદં યઃ સતતં પઠેત્ ।
પ્રસાદાભિમુખીલક્ષ્મીઃ સર્વં તસ્મૈ પ્રયચ્છતિ ॥ ૧૩૧॥

યસ્યા લક્ષ્મ્યાશ્ચ સમ્ભૂતાઃ શક્તયો વિશ્વગાઃ સદા ।
કારણત્વે ન તિષ્ઠન્તિ જગત્યસ્મિંશ્ચરાચરે ॥ ૧૩૨॥

તસ્માત્ પ્રીતા જગન્માતા શ્રીર્યસ્યાચ્યુતવલ્લભા ।
સુપ્રીતાઃ શક્તયસ્તસ્ય સિદ્ધિમિષ્ટાં દિશન્તિ હિ ॥ ૧૩૩॥

એક એવ જગત્સ્વામી શક્તિમાનચ્યુતઃ પ્રભુઃ ।
તદંશશક્તિમન્તોઽન્યે બ્રહ્મેશાનાદયો યથા ॥ ૧૩૪॥

તથૈવૈકા પરા શક્તિઃ શ્રીસ્તસ્ય કરુણાશ્રયા ।
જ્ઞાનાદિષાડ્ગુણ્યમયી યા પ્રોક્તા પ્રકૃતિઃ પરા ॥ ૧૩૫॥

એકૈવ શક્તિઃ શ્રીસ્તસ્યા દ્વિતીયાત્મનિ વર્તતે ।
પરા પરેશી સર્વેશી સર્વાકારા સનાતની ॥ ૧૩૬॥

અનન્તનામધેયા ચ શક્તિચક્રસ્ય નાયિકા ।
જગચ્ચરાચરમિદં સર્વં વ્યાપ્ય વ્યવસ્થિતા ॥ ૧૩૭॥

તસ્માદેકૈવ પરમા શ્રીર્જ્ઞેયા વિશ્વરૂપિણી ।
સૌમ્યા સૌમ્યેન રૂપેણ સંસ્થિતા નટજીવવત્ ॥ ૧૩૮॥

યો યો જગતિ પુમ્ભાવઃ સ વિષ્ણુરિતિ નિશ્ચયઃ ।
યા યા તુ નારીભાવસ્થા તત્ર લક્ષ્મીર્વ્યવસ્થિતા ॥ ૧૩૯॥

પ્રકૃતેઃ પુરુષાચ્ચાન્યસ્તૃતીયો નૈવ વિદ્યતે ।
અથ કિં બહુનોક્તેન નરનારીમયો હરિઃ ॥ ૧૪૦॥

અનેકભેદભિન્નસ્તુ ક્રિયતે પરમેશ્વરઃ ।
મહાવિભૂતિં દયિતાં યે સ્તુવન્ત્યચ્યુતપ્રિયામ્ ॥ ૧૪૧॥

તે પ્રાપ્નુવન્તિ પરમાં લક્ષ્મીં સંશુદ્ધચેતસઃ ।
પદ્મયોનિરિદં પ્રાપ્ય પઠન્ સ્તોત્રમિદં ક્રમાત્ ॥ ૧૪૨॥

દિવ્યમષ્ટગુણૈશ્વર્યં તત્પ્રસાદાચ્ચ લબ્ધવાન્ ।
સકામાનાં ચ ફલદામકામાનાં ચ મોક્ષદામ્ ॥ ૧૪૩ ॥

પુસ્તકાખ્યાં ભયત્રાત્રીં સિતવસ્ત્રાં ત્રિલોચનામ્ ।
મહાપદ્મનિષણ્ણાં તાં લક્ષ્મીમજરતાં નમઃ ॥ ૧૪૪ ॥

કરયુગલગૃહીતં પૂર્ણકુમ્ભં દધાના
ક્વચિદમલગતસ્થા શઙ્ખપદ્માક્ષપાણિઃ ।
ક્વચિદપિ દયિતાઙ્ગે ચામરવ્યગ્રહસ્તા
ક્વચિદપિ સૃણિપાશં બિભ્રતી હેમકાન્તિઃ ॥ ૧૪૫ ॥

॥ ઇત્યાદિપદ્મપુરાણે કાશ્મીરવર્ણને હિરણ્યગર્ભહૃદયે
સર્વકામપ્રદાયકં પુરુષોત્તમપ્રોક્તં
શ્રીલક્ષ્મીસહસ્રનામસ્તોત્રં સમાપ્તમ્ ॥

Corrected by Kirk Wortman kirkwort@hotmail.com

pUrvapIThikA is included from text entitled
kamalAsahasranAmastotra devIstutimanjarI edited by
Radhakrishnasastri from Mahaperiaval trust

---

*shrI mahAlaxmI sahasranAma stotram*
pdf was typeset on June 2, 2019

Please send corrections to *sanskrit@cheerful.com*